# द्वितीयः पाठः । अव्ययमाला । (कण्ठस्थीकरणार्थम्)

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।
तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम्॥

सुभाषितं नाम शोभनं भाषितम्। संस्कृतसाहित्ये विपुलानि सुभाषितानि सन्ति। अल्पाक्षरत्वं सुभाषितानां वैशिष्ट्यम्। मधुराणि गेयानि अर्थपूर्णानि एतानि सुभाषितानि। सुभाषितानां पठनेन वाणी सुसंस्कृता निर्दोषा च भवति। वक्तृत्वकलायां निपुणतासम्पादनार्थम् उत्कृष्ट-निबन्धलेखनार्थं च तानि अतीव उपयुक्तानि। अतः इयं सुभाषितानां माला छात्रैः अवश्यं कण्ठे धारणीया।

**श्रोतुं कर्णौ, वक्तुमास्यं सुहास्यं**
**घ्रातुं घ्राणं पादयुग्मं विहर्तुम्।**
**द्रष्टुं नेत्रे हस्तयुग्मं च दातुं**
**ध्यातुं चित्तं येन सृष्टं स पातु॥१॥**

[येन **श्रोतुं** कर्णौ, **वक्तुं** सुहास्यम् आस्यं, **घ्रातुं** घ्राणं, **विहर्तुं** पादयुग्मं, **द्रष्टुं** नेत्रे, **दातुं** हस्तयुग्मं **ध्यातुं** च चित्तं सृष्टं सः (ईश्वरः) पातु।]

**गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम्।**
**केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः॥२॥**

[दूरे वसताम् अपि सतां, गुणाः दूतत्वं कुर्वन्ति। (यथा) षट्पदाः केतकीगन्धम् **आघ्राय** (मधुपानाय) स्वयम् आयान्ति।]

**भुक्त्वा तृणानि शुष्काणि पीत्वा तोयं जलाशयात्।**
**दुग्धं यच्छन्ति लोकेभ्यो धेनवो लोकमातरः॥३॥**

[धेनवः शुष्काणि तृणानि **भुक्त्वा** जलाशयात् तोयं **पीत्वा** लोकेभ्यः दुग्धं यच्छन्ति। (ताः) लोकमातरः (खलु)।]

**यस्य षष्ठी चतुर्थी च विहस्य च विहाय च।**
**अहं कथं द्वितीया स्यात्, द्वितीया स्यामहं कथम्॥४॥**

[यस्य (कृते) **विहस्य** (इति) षष्ठी, **विहाय** (इति) चतुर्थी, अहं कथं च (इति) द्वितीया स्यात् (तस्य) अहं द्वितीया (पत्नी) कथं स्याम् ?]

**स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः।**
**इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत्॥५॥**

[स्थानभ्रष्टाः दन्ताः, केशाः, नखाः नराः च न शोभन्ते इति **विज्ञाय** मतिमान् (नरः) स्वस्थानं न परित्यजेत्।]

## भाषाभ्यासः



**श्लोकः १-**

**१. एकवाक्येन उत्तरत।**

अ) ईश्वरेण श्रोतुं किं दत्तम् ?
आ) आस्यं कीदृशम् ?
इ) ईश्वरेण विहर्तुं किं दत्तम् ?

## २. तालिकां पूरयत।

| किं दत्तम् | किं कर्तुम्? | किमर्थम् ? |
|---|---|---|
| कर्णौ दत्तौ | श्रोतुम् | श्रवणार्थम्/श्रवणाय |
| आस्यं दत्तम् | वक्तुम् | वचनार्थम्/वचनाय |
| घ्राणं दत्तम् | ________ | घ्राणार्थम्/________ |
| पादयुग्मं दत्तम् | ________ | ________/विहाराय |
| नेत्रे दत्ते | द्रष्टुम् | ________/दर्शनाय |

## ३. मेलनं कुरुत।

| अ | आ |
|---|---|
| कर्णः | करः |
| आस्यम् | रक्षतु |
| घ्राणम् | लोचनम् |
| पादः | श्रोत्रम् |
| नेत्रम् | तुण्डम् |
| हस्तः | नासिका |
| पातु | चरणः |

### श्लोकः २ –

**१. एकवाक्येन उत्तरत।**

अ) के दूतत्वं कुर्वन्ति ?
आ) के केतकीम् आजिघ्रन्ति ?

**२. सत्यं वा असत्यं लिखत।**

अ) सज्जनाः दूतत्वं कुर्वन्ति।
आ) षट्पदाः स्वयम् आयान्ति।
इ) सज्जनाः केतकीगन्धम् आजिघ्रन्ति।

**३. समानार्थकशब्दं चिनुत लिखत च।**

सज्जनाः, भ्रमराः, आगच्छन्ति।

**४. विरुद्धार्थकशब्दं लिखत।** गुणाः, दूरे, आयान्ति।

### श्लोकः ३ –

**१. एकवाक्येन उत्तरत।**

अ) धेनवः किं भुक्त्वा दुग्धं यच्छन्ति ?
आ) धेनवः जलाशयात् किं पिबन्ति ?
इ) लोकमातरः काः ?

**२. श्लोकात् त्वान्त-अव्यये चित्वा लिखत।**

**३. वाक्यं पठित्वा कर्ता, कर्म क्रियापदं च अन्विष्यत लिखत च।** दुग्धं यच्छन्ति धेनवः।

**४. एकवचने परिवर्तयत।**

लोकमातरः धेनवः शुष्काणि तृणानि खादन्ति।

### श्लोकः ४ –

**१. श्लोकात् ल्यबन्त-अव्ययानि चिनुत।**

**२. योग्यं रूपं चिनुत।**

अ) षष्ठी- विहस्य/देवस्य ।
आ) चतुर्थी- विहाय/गेहाय ।
इ) प्रथमा- अहम्/कथम् ।

### श्लोकः ५ –

**१. एकवाक्येन उत्तरत।**

अ) स्थानभ्रष्टाः के के न शोभन्ते ?
आ) किं विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ?

**२. समानार्थकशब्दैः वाक्यं पुनर्लिखत।**

स्थानभ्रष्टाः दन्ताः केशाः नखाः नराः न शोभन्ते।

**३. श्लोकात् प्रथमाविभक्तेः रूपाणि चित्वा लिखत।**

CFBUB5

# वर्णानां साहचर्यम्।




अस्माकं भिन्नानि उच्चारणस्थानानि यूयं जानीथ। वयं सर्वे सहैव तिष्ठामः। अस्माकं परस्परसाहचर्यं रोचकम्। यदा अस्मासु द्वयोः अतीव सन्निकर्षः भवति तदा यद् ध्वनिपरिवर्तनं भवति सः एव **सन्धिः**।




आवयोः संयोगेन आकारः भवति। यथा–
न + अस्ति = नास्ति।




आवयोः सन्निकर्षः ईकारे परिणमते।
यथा– रवि + इन्द्रः = रवीन्द्रः।




आवयोः अपि ऊकारः भवति।
यथा–भानु+उदयः = भानूदयः।




आवयोः संयोगेन ऋकारः भवति।
यथा– मातृ+ऋणम् = मातॄणम्।

(अयं समानानां वर्णानां दीर्घरूपः सन्धिः। अतः सः **सवर्णदीर्घसन्धिः** इति उच्यते।)




यदि आवयोः अतिशयितः सन्निधिः तर्हि आवयोः स्थाने एकारः उपतिष्ठति। यथा गण+ईशः इत्यस्य उच्चारणं गणेशः।




आवयोः सन्निकर्षस्य परिणामरूपेण द्वयोरपि स्थाने 'ओकारः' आयाति।
यथा– लम्ब+उदरः इति लम्बोदरः।




आवयोः संयोगेन ऐ इति सन्धिरूपः आदेशः भवति।
यथा– सदा + एव इति सदैव।




आवयोः संयोगेन औ इति सन्धिरूपः आदेशः भवति।
यथा– गङ्गा+ओघः इति गङ्गौघः।




यदा मम संयोगः स्वरेण भवति (इ/ई वर्जयित्वा) तदा मम परिवर्तनं 'य्' इति वर्णे भवति।
यथा– करोमि + अहम् इति करोम्यहम्।




स्वरेण सह (उ/ऊ वर्जयित्वा) संयोगेन मम स्थाने 'व्' इति वर्णः आयाति।
यथा– खलु + एतत् इति खल्वेतत्।

एवम् अस्माकं मिथः प्रभावः दृश्यते। यथा स्वरसन्धिः तथैव विसर्गसन्धिः व्यञ्जनसन्धिः च अपि भवतः। सन्धिरूपेण यद् ध्वनिपरिवर्तनम् अस्मासु भवति तद्विषयकाः नियमाः वर्तन्ते। यदि तद् ध्वनिपरिवर्तनं सुष्ठु न अवगतं, सन्धिनियमाः न पठिताः तर्हि अर्थावबोधनं न भवति।